Shri Shanmukha or AdhomukhasahasranamavaliH 6

# श्रीषण्मुख अथवा अधोमुखसहस्रनामावलिः ६

## Document Information

Text title : Shanmukha or adhomukhasahasranAmAvalI

File name : ShaNmukhaadhomukhasahasranAmAvalI.itx

Category : sahasranAmAvalI, subrahmanya

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Description-comments : Subrahmanya stuti manjari p259+, pratimukhashaNmukasahasranAmAvalI

Latest update : November 2, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# श्रीषण्मुख अथवा अधोमुखसहस्रनामावलिः ६

ॐ श्रीगणेशाय नमः ।

अधोमुखपूजा ।
(अकारादि क्षकारान्ता)
ॐ अचिन्त्य शक्तये नमः । अनघाय । अक्षोभ्याय । अपराजिताय ।
अनाथवत्सलाय । अमोघाय । अशोकाय । अजराय । अभयाय । अत्युदाराय ।
अघहराय । अग्रगण्याय । अद्रिजासुताय । अनन्तमहिम्ने । अपराय ।
अनन्तसौख्यदाय । अन्नदाय । अव्ययाय । अनुत्तमाय । अक्षयाय नमः । (२०)

ॐ अनादये नमः । अप्रमेयाय । अक्षराय । अच्युताय । अकल्मषाय ।
अभिरामाय । अग्रधुर्याय । अमितविक्रमाय । अतुलाय । अमृताय ।
अघोराय । अनन्तविक्रमाय । अनाथनाथाय । अमलाय । अप्रमत्ताय ।
अमरप्रभवे । अरिन्दमाय । अखिलाधाराय । अणिमादिगुणाय ।
अगरण्ये नमः । (४०)

ॐ अचञ्चलाय नमः । अमरस्तुत्याय । अकलङ्काय । अमिताशनाय ।
अग्निभुवे । अनवद्याङ्गाय । अद्भुताय । अभीष्टदायकाय ।
अतीन्द्रियाय । अमेयात्मने । अदृश्याय । अव्यक्तलक्षणाय ।
आपद्विनाशकाय । आर्याय । आढ्याय । आगमसंस्तुताय ।
आर्तसंरक्षणाय । आद्याय । आनन्दाय । आर्यसेविताय नमः । (६०)

ॐ आश्रितेष्टार्थवरदाय नमः । आनन्दिने । आर्तफलप्रदाय ।
आश्चर्यरूपाय । आनन्दाय । आपन्नार्तिविनाशनाय ।
इभवक्त्रानुजाय । इष्टाय । इभासुरहरात्मजाय ।
इतिहासस्तुतिश्रुत्याय (श्रुतिस्तुत्याय)। इन्द्रभोगफलप्रदाय ।
इष्टापूर्ति(र्त)फलप्राप्तये । इष्टेष्टवरदायकाय ।
इहामुत्रेष्टफलदाय । इष्टदाय । इन्द्रवन्दिताय । ईडनीयाय ।
ईशपुत्राय । ईप्सितार्थप्रदायकाय । ईतिहराय नमः । (८०)

ॐ ईड्याय नमः । ईषणात्रयवर्जिताय । उदारकीर्तये । उद्योगिने ।
उत्कृष्टाय । उरुपराक्रमाय । उत्कृष्टशक्तये । उत्साहाय ।
उदाराय । उत्सवप्रियाय । उज्जृम्भाय । उद्भवाय । उग्राय ।
उदग्राय । उग्रलोचनाय । उन्मत्ताय । उष्णशमनाय ।
उद्वेगघ्नाय । उरगेश्वराय । उरुप्रभावाय नमः । (१००)
उदीर्णाय नमः । उमासूनवे । उदारधिये । ऊर्ध्वरेतस्सुताय ।
ऊर्ध्वगतिदायकाय । ऊर्जपालकाय । ऊर्जिताय । ऊर्ध्वगाय ।
ऊर्ध्वाय । ऊर्ध्वलोकैकनायकाय । ऊर्जस्वते । ऊर्जितोदाराय ।
ऊर्जितोर्जितशासनाय । ऋजुकराय । ऋजुरूपाय ।
ऋषिदेवगणस्तुत्याय । ऋणत्रयविमोचनाय ।
ऋतुभराय । ऋजुप्रीताय नमः । (१२०)

ॐ ऋषभाय नमः । ऋद्धिदेवाय । ऋचे । लुलितोदारकाय ।
लुलितभवप्राशप्रभञ्जनाय । एणाङ्कधरसत्पुत्राय ।
एकस्मै । एनौघनाशनाय । ऐश्वर्यदाय । ऐन्द्रभोगिने ।
ऐन्द्रीहाय । ऐन्द्रीविभूतये । ओजस्विने । औषधिस्थानाय ।
ओजोदाय । ओदनप्रियाय । औदार्यशीलाय । औमेयाय । औग्राय ।
औन्नत्यदायकाय नमः । (१४०)

ॐ औदार्याय नमः । औषधकाराय । औषधाय । औषधकराय ।
अशुम्मते । अशुम्मालाढ्याय । अम्बिकातनयाय । अन्नदाय ।
अन्धकारिसुताय । अन्धत्वहारिणे । अम्बुजलोचनाय । अस्तमायाय । अस्पष्टाय
।
अमराधीशाय । अस्तोकपुण्यदाय । अस्तामित्राय । अस्तरूपाय ।
अस्खलत्सुगतिदायकाय । कार्तिकेयाय । कामरूपाय नमः । (१६०)

ॐ कुमाराय नमः । क्रौञ्चदारणाय । कामदाय । कारणाय । काम्याय ।
कमनीयाय । कृपाकराय । काञ्चनाभाय । कान्तिमुक्ताय । कामिने ।
कामप्रदाय । कवये । कीर्तिकृते । कुक्कुटधराय । कूटस्थाय ।
कुवलयेक्षणाय । कुङ्कुमाङ्गाय । क्लमहराय । कुशलाय ।
कुक्कुटध्वजाय नमः । (१८०)

ॐ कृशानुसम्भावाय नमः । क्रूराय । क्रूरघ्नाय । कलितापहृते ।
कामरूपाय । कल्पतरवे । कान्ताय । कामिदायकाय । कल्याणकृते ।

क्लेशनाशनाय । कृपालवे । करुणाकराय । कलुषघ्नाय ।
क्रियाशक्तये । कठोराय । कवचिने । कुविने । कोमलाङ्गाय ।
कुशप्रीताय । कुत्सितघ्नाय नमः । (२००)

ॐ कलाधराय नमः । ख्याताय । खेटतराय । खडगिने । खट्वाङ्गिने ।
खलनिग्रहाय । ख्यातिप्रदाय । खेचरेशाय । ख्यातेहाय ।
खेचरस्तुताय । खरतापहराय । खस्थाय । खेचराय ।
खेचराश्रयाय । खण्डेन्दुमौलितनयाय । खेलाय । खेचरपालाय ।
खस्थलाय । खण्डितार्काय । खेचरीजनपूजिताय नमः । (२२०)

ॐ गाङ्गेयाय नमः । गिरिजापुत्राय । गणनाथानुजाय । गुहाय । गोप्त्रे ।
गीर्वाण संसेव्याय । गुणातीताय । गुहाश्रयाय । गतिप्रदाय ।
गुणनिधये । गम्भीराय । गिरिजात्मजाय । गूढरूपाय । गदाहराय ।
गुणाधीशाय । गुणाग्रण्ये । गोधराय । गहनाय । गुप्ताय ।
गर्वघ्नाय नमः । (२४०) गुणवर्धनाय नमः । गुह्याय । गुणज्ञाय ।
गीतज्ञाय । गतातङ्काय । गुणाश्रयाय । गद्यपद्यप्रियाय ।
गुण्याय । गोस्तुताय । गगनेचराय । गणनीय चरित्राय ।
गतक्लेशाय । गुणार्णवाय । घूर्णिताक्षाय । घृणानिधये ।
घनगम्भीरघोषणाय । घण्टानादप्रियाय । घोराघौघनाशनाय ।
घनप्रियाय । घनानन्दाय नमः । (२६०)

ॐ घर्महन्त्रे नमः । घ्रुणावते । घृष्टिपालकाय ।
घृणिने । घ्रुणाकाराय । घोषाय । घोरदैत्यप्रहारकाय ।
घटितैश्वर्यसन्दोहाय । घनार्थिने । घनविक्रमाय ।
चित्रकृते । चित्रवर्णाय । चञ्चलाय । चपलद्युतये ।
चिन्मयाय । चित्स्वरूपाय । चिदानन्दाय । चिरन्तनाय ।
चित्रचेलाय । चित्रधराय नमः । (२८०)

ॐ चिन्तनीयाय नमः । चमत्कृतये । चोरघ्नाय । चतुराय ।
चारवे । चामीकरविभूषणाय । चन्द्रार्ककोटिसदृशाय ।
चन्द्रमौलितनूभवाय । छादिताङ्गाय । छद्महन्त्रे ।
छेदिताखिलपातकाय । छेदीकृततमः क्लेशाय ।
छत्रीकृतमहायशसे । छादिताशेषसन्तापाय ।
छरितामृतसागराय । छन्नत्रैगुण्यरूपाय । छातेहाय ।

छिन्नसंशयाय । छन्दोमयाय । छन्दोगामिने नमः । (३००)

ॐ छविच्छदाय नमः । जगद्धिताय । जगत्पूज्याय । जगज्ज्येष्ठाय ।
जगन्मयाय । जनकाय । जाह्नवीसूनवे । जितामित्राय । जगद्गुरवे ।
जयिने । जितेन्द्रियाय । जैत्राय । जरामरणवर्जिताय ।
ज्योतिर्मयाय । जगन्नाथाय । जगज्जीवाय । जनाश्रयाय ।
जगद्वन्द्याय । जगच्छ्रेष्ठाय । जितक्लेशाय नमः । (३२०)

ॐ जगद्विभवे नमः । जगत्सेव्याय । जगत्कर्त्रे ।
जगत्साक्षिणे । जगत्प्रियाय । जम्भारिवन्द्याय । जयदाय ।
जगज्जनमनोहराय । जगजाड्यापहारकाय । जगदानन्दजनकाय ।
जपाकुसुमसङ्काशाय । जनलोचनशोभनाय । जनेश्वराय ।
जगद्वन्द्याय । जनजन्मसनिबर्हणाय । जयदाय । जन्तुतापघ्नाय ।
जितदैत्यमहाव्रजाय । जिताय । जितक्रोधाय नमः । (३४०)

ॐ जितदम्भाय नमः । जनप्रियाय । झञ्झानिलमहावेगाय ।
झरिताशेषपातकाय । झर्झरीकृतदैत्यौघाय ।
झल्लरीवाद्यसुप्रियाय । ज्ञानमूर्तये । ज्ञानगम्याय । ज्ञानिने ।
ज्ञानमहानिधये । टङ्कारनित्यविभवाय । टङ्किताखिललोकाय ।
टङ्कितैनस्तमोरवये । डम्भरप्रभवे । डम्भाय ।
डमड्डमरुकप्रियाय । डमरोत्कटजाण्डजाय । ढक्कानादप्रियाय ।
(ढु)लुलितासुरसदलाय । ढाकितामरसन्दोहाय नमः । (३६०)

ॐ दुण्डिविघ्नेश्वरानुजाय नमः । तत्त्वज्ञाय । तत्त्वगाय । तीव्राय ।
तपोरूपाय । तपोमयाय । त्रयीमयाय । त्रिकालज्ञाय । त्रिमूर्तये ।
त्रिगुणात्मकाय । त्रिदशेशाय । तारकारये । तापघ्नाय ।
तापसप्रियाय । तुष्टिदाय । तुष्टिकृते । तीक्ष्णाय । तपोरूपाय ।
त्रिकालविदे । स्तोत्रे नमः । (३८०)

ॐ स्तव्याय नमः । स्तवप्रीताय । स्तुतये । स्तोत्राय । स्तुतिप्रियाय ।
स्थिताय । स्थायिने । स्थापकाय । स्थूलसूक्ष्मप्रदर्शकाय ।
स्थविष्ठाय । स्थविराय । स्थूलाय । स्थानदाय । स्थैर्याय । स्थिराय ।
दान्ताय । दयापराय । दात्रे । दुरितघ्नाय । दुरासदाय नमः । (४००)

ॐ दर्शनीयाय नमः । दयासाराय । देवदेवाय । दयानिधये ।
दुराधर्षाय । दुर्विगाह्याय । दक्षाय । दर्पणशोभिताय । दुर्धराय ।

दानशीलाय । द्वादशाक्षराय । द्विषड्भुजाय । द्विषड्कर्णाय ।
द्विषड्भ्रूभङ्गाय । दीनसन्तापनाशनाय । दन्दशूकेश्वराय ।
देवाय । दिव्याय । दिव्याकृतये । दमाय नमः । (४२०)

ॐ दीर्घवृत्ताय नमः । दीर्घबाहवे । दीर्घदृष्टये । दिवस्पतये ।
दण्डाय । दमयित्रे । दर्पाय । देवसिंहाय । दृढव्रताय ।
दुर्लभाय । दुर्गमाय । दीप्ताय । दुष्प्रेक्षाय । दिव्यमण्डनाय ।
दुरोदरघ्नाय । दुःखघ्नाय । दुष्टारिघ्नाय । दिशाम्पतये ।
दुर्जयाय । देवसेनेशाय नमः । (४४०)

ॐ दुर्ज्ञेयाय । दुरतिक्रमाय । दम्भाय । दृप्ताय । देवर्षये ।
दैवज्ञाय । दैवचिन्तकाय । धुरन्धराय । धर्मपराय ।
धनदाय । धृतिवर्धनाय । धर्मेशाय । धर्मशास्त्रज्ञाय ।
धन्विने । धर्मपरायणाय । धनाध्यक्षाय । धनपतये ।
धृतिमते । धृति(त)किल्बिषाय । धर्महेतवे नमः । (४६०)

ॐ धर्मशूराय । धर्मकृते । धर्मविदे । ध्रुवाय । धात्रे ।
धीमते । धर्मचारिने । धन्याय । धुर्याय । धृतव्रताय ।
नित्योत्सवाय । नित्यतृप्ताय । निश्चलात्मकाय । निरवद्याय ।
निराकाराय । निष्कलङ्काय । निरञ्जनाय । निर्मयाय । निर्मनिमेषाय ।
निरहङ्काराय । निर्मोहाय नमः । (४८०)

ॐ निरुपद्रवाय नमः । नित्यानन्दाय । निरातङ्काय । निष्प्रपञ्चाय ।
निरामयाय । निरवद्याय । निरीहाय । निर्द्वन्द्वाय । निर्मलात्मकाय ।
नित्यानन्दाय । निर्जरेशाय । निस्सङ्गाय । निगमस्तुताय ।
निष्कण्टकाय । निरालम्बाय । निष्प्रत्यूहाय । निजोद्भवाय ।
नित्याय । नियमकल्याणाय । निर्विकल्पाय नमः । (५००)

ॐ निराश्रयाय नमः । नेत्रे । निधये । नैकरूपाय । निराकाराय ।
नदीसुताय । पुलिन्दकन्यारमणाय । पुरजिते । परमप्रियाय ।
प्रत्यक्षमूर्तये । प्रत्यक्षाय । परेशाय । पूर्णपुण्याय ।
पुण्यकाराय । पुण्यरूपाय । पुण्याय । पुण्यपरायणाय । पुण्योदयाय ।
परस्मैतिज्योतिषे । पुण्यकृते नमः । (५२०)

ॐ पुण्यवर्धनाय नमः । परानन्दाय । परतराय । पुण्यकीर्तये ।
पुरातनाय । प्रसन्नरूपाय । प्राणेशाय । पन्नगाय । पवनाशनाय ।

प्रणतार्तिहराय । पूर्णाय । पार्वतीनन्दनाय । प्रभवे ।
पूतात्मने । पुरुषाय । प्राणाय । प्रभवाय । पुरुषोत्तमाय ।
प्रसन्नाय । परमस्पष्टाय नमः । (५४०)

ॐ पटवे नमः । परिबृढाय । पराय । परमात्मने । परब्रह्मणे ।
परार्थाय । प्रियदर्शनाय । पवित्राय । पुष्टिदाय । पूर्तये ।
पिङ्गलाय । पुष्टिवर्धनाय । पापहारिणे । पाशधराय ।
प्रमत्तासुरशिक्षकाय । पावनाय । पावकाय । पूज्याय ।
पूर्णानन्दाय । परात्पराय नमः । (५६०)

ॐ पुष्कलाय नमः । प्रवराय । पूर्वाय । पितृभक्ताय । पुरोगमाय ।
प्राणदाय । प्राणिजनकाय । प्रदिष्टाय । पावकोद्भवाय ।
परब्रह्मस्वरूपाय । परमेश्वर्यकारणाय । परार्थदाय । परहिताय ।
पुष्टिकराय । प्रकाशात्मने । प्रतापवते । प्रज्ञापराय ।
प्रकृष्टार्थाय । पृथवे । पृथुपराक्रमाय नमः । (५८०)

ॐ फणीश्वराय नमः । फणिवराय । फणाफणिविभूषणाय ।
फलदाय । फलहस्ताय । फुल्लाम्बुजविलोचनाय ।
फटच्छ(टाश)मितपापौघाय । फणिलोकविभूषणाय ।
बाहुलेयाय । बृहद्रूपाय । बलिष्ठाय । बलवते । बलिने ।
ब्रह्मेशविष्णुरूपाय । बुद्धये । बुद्धिमतांवराय । बालरूपाय ।
बृहद्गर्भाय । ब्रह्मचारिणे । बुधप्रियाय नमः । (६००)

ॐ बहुश्रुताय नमः । बहुमताय । ब्रह्मण्याय । ब्राह्मणप्रियाय ।
बलप्रमथनाय । ब्रह्मणे । ब्रह्मरूपाय । बहुप्रदाय ।
बृहद्भानुतनूद्भवाय । बृहत्सेनाय । बिलेशयाय । बहुबाहवे ।
बलश्रीमते । बहुदैत्यविनाशनाय । बिलद्वारान्तरालस्थाय ।
बृहच्छक्तिधनुर्धराय । बालार्कद्युतिमते । बालाय ।
बृहद्वससे । बृहत्तनवे नमः । (६२०)

ॐ भव्याय नमः । बोगीश्वराय । भाव्याय । भवनाशनाय ।
भवप्रियाय । भक्तिगम्याय । भयहराय । भावज्ञाय ।
भक्तसुप्रियाय । भुक्तिमुक्तिप्रदाय । भोगिने । भगवते ।
भाग्यवर्धनाय । भ्राजिष्णवे । भावनाय । भर्त्रे । भीमाय ।
भीमपराक्रमाय । भूतिदाय । भूतिकृते नमः । (६४०)

ॐ भोक्त्रे नमः । भूतात्मने । भुवनेश्वराय । भावकाय ।
भाग्यकृते । भेषजाय । भावकेष्टाय । भवोद्भवाय ।
भवतापशमनाय । भोगवते । भूतभावनाय । भोज्यप्रदाय ।
भ्रान्तिनाशनाय । भानुमते । भुवनाश्रयाय । भूरिभोगप्रदाय ।
भद्राय । भजनीयाय । भिषग्वराय । महासेनाय नमः । (६६०)

ॐ महोदाराय नमः । महाशक्तये । महाद्भुताय (महाद्युतये) ।
महाबुद्धये । महावीर्याय । महोत्साहाय । महाबलाय । महाभोगिने ।
महामायिने । मेधाविने । मेखलिने । महते । मुनिस्तुत्याय ।
महामान्याय । महानन्दाय । महायशसे । महोर्जिताय । माननिधये ।
मनोरथफलप्रदाय । महोदयाय नमः । (६८०)

ॐ महापुण्याय नमः । महाबलपराक्रमाय । मानदाय । मतिदाय ।
मालिने । मुक्तामालाविभूषिताय । मनोहराय । महामुख्याय ।
महर्द्धये । मूर्तिमते । मुनये । महोत्तमाय । महोपायाय ।
मोक्षदाय । मङ्गलप्रदाय । मुदाकराय । मुक्तिदात्रे । महाभोगाय ।
महोरगाय । यशस्कराय नमः । (७००)

ॐ योगयोनये नमः । योगीष्ठाय । यमिनां वराय । यशश्विने ।
योगपुरुषाय । योग्याय । योगनिधये । यमिने । यतिसेव्याय ।
योगयुक्ताय । योगविदे । योगसिद्धिदाय । यन्त्राय । यन्त्रिणे ।
यन्त्रज्ञाय । यन्त्रवते । यन्त्रवाहकाय । यातनारहिताय ।
योगिने । योगीशाय नमः । (७२०)

ॐ योगिनां वराय नमः । रमणीयाय । रम्यरूपाय । रसज्ञाय ।
रसभावकाय । रञ्जनाय । रञ्जिताय । रागिणे । रुचिराय ।
रुद्रसम्भवाय । रणप्रियाय । रणोदाराय । रागद्वेषविनाशकाय ।
रम्यार्चिरुचिराय । रम्याय । रूपलावण्यविग्रहाय । रत्नाङ्गधराय ।
रत्नभूषणाय । रमणीयकायाय । रुचिकृते नमः । (७४०)

ॐ रोचमानाय नमः । रञ्जिताय रोगनाशनाय । राजीवाक्षाय ।
राजराजाय । रक्तमाल्यानुलेपनाय । ऋग्यजुस्सामसंस्तुत्याय ।
रजस्सत्वगुणान्विताय । रजनीशकलारम्याय । रत्नकुण्डलमण्डिताय ।
रत्नसन्मौलिशोभाढ्याय । रणनन्मञ्जीरभूषणाय । लोकैकनाथाय ।
लोकेशाय । ललिताय । लोकनायकाय । लोकरक्षकाय । लोकशिक्षाय ।

लोकलोचनरञ्जिताय । लावण्यविग्रहाय नमः । (७६०)

ॐ लोकचूडामणये नमः । लीलावते । लोकाध्यक्षाय । लोकवन्द्याय ।
लोकोत्तरगुणाकराय । लोकबन्धवे । लोकधात्रे । लोकत्रयमहाहिताय ।
वरिष्ठाय । वरदाय । वन्द्याय । विशिष्टाय । विक्रमाय ।
विभवे । विबुधाग्रचराय । वश्याय । विकल्पवर्जिताय ।
विपाशाय । विगतातङ्काय । विचित्राङ्काय नमः । (७८०)

ॐ विरोचनाय नमः । विद्याधराय । विशुद्धात्मने । वेदाङ्गाय ।
विबुधप्रियाय । वचस्कराय । व्यापकाय । विज्ञानिने ।
विनयान्विताय । विद्वत्तमाय । विरोधघ्नाय । वीराय ।
विगतरागवते । वीतभावाय । विनीतात्मने । वेदगर्भाय ।
वसुप्रदाय । विश्वदीप्तये । विशालाक्षाय । विजितात्मने नमः । (८००)

ॐ विभावनाय नमः । वेदवेद्याय । विधेयात्मने । वीतदोषाय ।
वेदविदे । विश्वकर्मणे । वीतभयाय । वागीशाय । वासवार्चिताय ।
वीरध्वंसकाय । विश्वमूर्तये । विश्वरूपाय । वरासनाय ।
विशिखाय । विशाखाय । विमलाय । वाग्मिने । विदुषे । वेदधराय ।
वटवे नमः । (८२०)

ॐ वीरचूडामणये नमः । वीराय । विद्येशाय । विबुधाश्रयाय ।
विजयिने । वेत्रे । वरीयसे । विरजसे । वसवे । वीरघ्नाय ।
विज्वराय । वेद्याय । वेगवते । वीर्यवते । वशिने । वरशीलाय ।
वरगुणाय । विशोकाय । वज्रधारकाय । शरजन्मने नमः । (८४०)

ॐ शक्तिधराय नमः । शत्रुघ्नाय । शिखिवाहनाय । श्रीमते ।
शिष्टाय । शुचसे । शुद्धाय । शाश्वताय । श्रुतिसागराय ।
शरण्याय । शुभदाय । शर्मणे । शिष्टेष्टाय । शुभलक्षणाय ।
शान्ताय । शूलधराय । श्रेष्टाय । शुद्धात्मने । शङ्कराय ।
शिवाय नमः । (८६०)

ॐ शितिकण्ठाय नमः । शूराय । शान्तिदाय । शोकनाशनाय ।
षण्मुखाय । षड्गुणैश्वर्यसंयुताय । षट्चक्रस्थाय ।
षडूर्मिघ्नाय । षडङ्गश्रुतिपारगाय । षड्भावरहिताय ।
षड्गुणाय । षट्शास्त्रस्मृतिपारगाय । षड्वर्गदात्रे ।
षड्ग्रीवाय । षडरिघ्नाय । षडाश्रयाय । षट्किरीटधराय

श्रीमते । षडाधराय । षट्क्रमाय । षट्कोणमध्यनिलयाय नमः । (८८०)

ॐ षण्ढत्वपरिहारकाय नमः । सेनान्ये । सुभगाय । स्कन्दाय ।
सुरानन्दाय । सन्तां गतये । सुब्रह्मण्याय । सुराध्यक्षाय ।
सर्वज्ञाय । सर्वदाय । सुखिने । सुलभाय । सिद्धिदाय । सौम्याय ।
सिद्धोदाय । । सिद्धेशाय । सिद्धिसाधनाय । सिद्धार्थाय ।
सिद्धसङ्कल्पाय । सिद्धसाधनाय । सुरेश्वराय नमः । (९००)

ॐ सुभुजाय नमः । सर्वदृशे । साक्षिणे । सुप्रसादाय । सनातनाय ।
सुधापतये । स्वयञ्ज्योतिषे । स्वयम्भुवे । सर्वतोमुखाय ।
समर्थाय । समक्षिणे । सत्कृतये (सत्कृतते) । सूक्ष्माय ।
सुघोषाय । सुखदाय । सुहृदे । सुप्रसन्नाय । सुरश्रेष्ठाय ।
सुरशीलाय । सत्यसाधकाय । सम्भाव्याय नमः । (९२०)

ॐ सुमनसे नमः । सेव्याय । सकलागमपारगाय ।
सुव्यक्ताय । सच्चिदानन्दाय । सुवीराय । सुजनाश्रयाय ।
सर्वलक्षणसम्पन्नाय । सत्यधर्मपरायणाय । सर्वदेवमयाय ।
सत्याय । सदामृष्टान्नदायकाय । सुधापाय । सुमतये । सत्याय ।
सर्वविघ्नविनाशकाय । सर्वदुःखप्रशमनाय । सुकुमाराय ।
सुलोचनाय । सुग्रीवाय नमः । (९४०)

ॐ सुधृतये नमः । साराय । सुराराध्याय । सुविक्रमाय ।
सुरारिघ्नाय । स्वर्णवर्णाय । सर्पराजाय । सुदाशुचये ।
सप्तार्चिर्भुवे । सुखदाय । सर्वयुद्धविशारदाय ।
हस्तिचर्माम्बरसुताय । हस्तिवाहनसेविताय ।
हस्तचित्रायुधधराय । हताघाय । हसिताननाय । हेमभूषाय ।
हरिद्वर्णाय । हृष्टिदाय । हृष्टिवर्धनाय नमः । (९६०)

ॐ हेलाद्रिभिये नमः । हंसरूपाय । हुङ्कारहतकिल्बिषाय ।
हिमाद्रिजातनुभवाय । हरिकेशाय । हिरण्यमयाय । हृद्याय ।
हृष्टाय । हरिसखाय । हंसगतये । हंसाय । हविषे ।
हिरण्यवर्णाय । हितकृते । हर्षदाय । हेमभूषणाय ।
हरिप्रियाय । हितकराय । हतपापाय । हरोद्भवाय नमः । (९८०)

ॐ क्षेमदाय । क्षेमकृते । क्षेम्याय । क्षेत्रज्ञाय ।
क्षामवर्जिताय । क्षेत्रपालाय । क्षमाधराय ।

क्षेमक्षेत्राय । क्षमाकराय । क्षुद्रघ्नाय ।
क्षान्तिदाय । क्षेमाय । क्षितिभूषाय । क्षमाश्रयाय ।
क्षालिताघाय । क्षितिधराय । क्षीणसाररक्षणेक्षणाय ।
क्षणभङ्गुरसन्नद्धघनशोभिकपर्दकाय ।
क्षितिभृन्नाथतनयामुखपङ्कजभास्कराय । श्रीगुहाय नमः । (१०००)

अधोमुखपूजनं सम्पुर्णम् ।
इति षण्मुखसहस्रनामावलिः सम्पूर्णा ।
ॐ शरवणभवाय नमः ।
ॐ तत्सत् ब्रह्मार्पणमस्तु ।

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan, PSA Easwaran

ShaNmukhArchana as a way of worship is founded upon the tattva (principle) that Shiva and Shanmukha are one and the same.

Shiva mandated that Brahma, Vishnu and Rudra would all be of the same status - they were essentially of the manifestations of His origin. They would carry out 'Panchakrutya' or Five Duties, viz., Srishti' (Creation), 'Sthiti' (Preservation) and 'Laya' (Destruction), 'Tirobhav' (Concealment and Revival) and 'Anugraha' (Providing Salvation). Srishti would be performed by Brahma, Sthiti by Vishnu, and Laya by Rudra; the fourth task, viz. Tirobhav would be performed by Mahesha, who would be yet His fourth manifestation and finally the most significant task of Anugraha would be the exclusive dispensation by Himself. [shivapurANA].

The manifestation of these forms of Shiva may be called as IshAna, tatpuruSha, aghora, vAmadeva and sadyojAta. To perceive, visualize, and conceptualize these manifestations, we worship the Linga in four directions as four faces and one on the top, making it five murti-s. These five faces seem to be apparent and patently known to us. However, as we advance, we realize that "parabrahma" has no form and is beyond description and conceptualization; we worship the brahma tattva through the sixth (antar-adho) mukham that is latent and inside the Linga. These six mukhams are the six faces of Lord Subrahmanya. Hence the ShaNmukhArchanA covers the sahasranAmAvali for the five faces and that of adhomukham which can be realised only through samAdhi.

The nAmAvali-s of the sixth face are couched and formulated as "matrukAkShara" from a to kSha, forming an exclusive and indispensable part of ShaNmukhArchanA. [There may be some variations - some texts contain as many as 1200 nAmAvali-s].

Many of these nAmAvali-s are propounded by the vedA-s. The 300 names in Rudra anuvAkam and those extolling the exalted and enlightened status of the Lord are found in the nAmAvali-s that a discerning upAsakA would be prompted to recall the lines in shri viShNu sahasranAma and others. After all, when we say "parabrahma", there is no distinction

amongst the murti-s; all are one and the same. Hence, to reflect His eternal beauty and execution of panchakrutya. these namavali-s aptly and appropriately reveal and portray vividly the leelAvatara or appearance of Shri Guha. (by Shri Radhakrishna Sastrigal in Tamil. Translated by Sivakumar Thyagarajan).

---

*Shri Shanmukha or AdhomukhasahasranamavaliH 6*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*